Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २१९
जुलाई - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्



### किञ्चित् आचरणम्

महात्मा गान्धी स्वातन्त्र्यसङ्ग्रामे स्वीयं जीवनं निवेशितवान् इति प्रसिद्धम् एव। परन्तु तेन महता कार्येण वयं विस्मृतवन्तः यत् महात्मा कश्चित् श्रेष्ठः कृष्णभक्तः अपि आसीत् । भगवद्गीता तस्य परमा मार्गदर्शिका आसीत् । कृष्णस्य उपदेशम् अनु जीवन् सः 'अनासक्तियोग' नामकं लघु भाष्यम् अपि लिखितवान् । एकः मोहनः श्रीकृष्णः, अपरः मोहनः महात्मा गान्धी । द्वयोः यथा नाम्नि, तथैव जीवने बहुत्र साम्यं दृश्यते । किञ्चित् चिन्तयामः।

गान्धी आहारं विहारं च प्रति संयमी आसीत् । गीतायां युक्तौ आहारविहारौ प्रशस्येते । शयनजागरणयोः गान्धी आग्रहवान् आसीत्। युक्तस्वप्नावबोध... इति वयं जानीमः एव। संयमः, अनासक्तिः, प्रसन्नता, निःस्पृहता च गान्धिवर्यस्य जीवने नित्यं प्रकाशते। गीतायां स्थितप्रज्ञस्य एतानि लक्षणानि वर्तन्ते। गान्धी 'अनासक्तियोग' पुस्तके लिखति यत् 'यः कर्म त्यजति सः पतति।' गीतायां कर्मणः महत्त्वं स्पष्टमेव। गान्धिवर्यस्य मतेन सर्वविधं कष्टम् अस्मदीयम् अकौशलं वर्तते। यदा कौशलस्य उदयः भवति तदा कष्टकरम् अपि कर्म आनन्दमयं भवति। अत्र 'योगः कर्मसु कौशलम्' स्मरणपथम् आयाति। महादेववर्यः लिखति यत् 'जनाः मां महात्मानं मन्यन्ते। तस्मात् मम स्वल्पम् अपि दोषं जनाः अनुकरिष्यन्ति। इति चिन्तयन् महात्मा स्ववर्तनं प्रति सदा जागरूकः आसीत्।' यत् यत् आचरति श्रेष्ठः इति गीतावचनं महात्मा सम्यक् अवगच्छति स्म। यवनानां नेता झीणा गान्धिनः विरोधी आसीत्। परन्तु गान्धी तं प्रति द्वेषशून्यः एव आसीत्। 'अद्वेष्टा सर्वभूतानाम्' गान्धिवर्यस्य आचरणे आसीत्।

सत्यम्, अहिंसा, अभयम्, सत्त्वसंशुद्धिः इत्यादयः नैके गुणाः गान्धिवर्यस्य जीवने सङ्ग्रथिताः आसन्। गीतायाः पाठः प्रशंसनीयः एव, किन्तु तेन सह कृतं किञ्चित् आचरणम् एव मनुष्यस्य जीवनम् अलङ्करोति।

## पञ्चकल्याणी अश्वः

**– जातककथा**

ब्रह्मदत्तः यदा काशीराज्यं पालयति स्म तदा बोधिसत्त्वः उत्तमजीयाश्वत्वेन जन्म प्राप्तवान् आसीत्। राज्ञः अश्वेषु अत्युत्तमः आसीत् सः। अतः एव 'पञ्चकल्याणी' इति तस्य नाम जातम् आसीत्।

अतः तस्य पोषणं विशेषतया क्रियते स्म। तस्य अलङ्कारः अपि राजपरम्परायाः अनुगुणम् एव भवति स्म। वर्षत्रयात् पूर्वं प्रवृद्धेन धान्येन तदीयः आहारः सज्जीक्रियते स्म। सहस्रस्वर्णमुद्रात्मकेन मूल्येन युक्तायां स्थालिकायां तस्मै आहारः दीयते स्म। यस्याम् अश्वशालायां सः बध्यते सा च अश्वशाला सदा सुगन्धयुता भवति स्म। तस्याः चतसृषु दिक्षु जवनिका लम्बन्ते स्म। छदिः सुवर्णपुष्पैः अलङ्कृता भवति स्म। द्वाराणि सुगन्धयुक्तैः पुष्पैः सुशोभितं भवति स्म। दिने रात्रौ च अश्वपालकाः तस्याम् अश्वशालायां गन्धवर्तिकाः ज्वालयन्ति स्म। तस्मात् सः परिसरः एव सौगन्ध्यमयः भवति स्म।

एतादृशम् उत्तमम् अश्वं वहतः राज्ञः वैभवं दृष्ट्वा प्रतिवेशिनः बहवः राजानः महतीम् असूयाम् अनुभवन्ति स्म। ते चिन्तयन्ति स्म यत् अस्माभिः काशीराज्यं कथमपि वशीकरणीयम्। किन्तु एकाकितया तत् कार्यं साधयितुं सामर्थ्यं तेषु कस्यापि न आसीत्। अतः ते सम्भूय निश्चितवन्तः यत् अस्माभिः सर्वैः सम्भूय गत्वा आक्रमणं कृत्वा तत् राज्यं वशीकरणीयम् ।

अथः कदाचित् ते सप्त अपि सामन्तराजाः सम्भूय ससैन्यं काशीराज्यसमीपम् आगत्य वार्त्तां प्रेषितवन्तः– "भवता विना प्रतिरोधं राज्यम् अस्मदधीनं करणीयम्। अन्यथा अस्मान् सम्मुखीकर्तुं सिद्धेन भाव्यम्। वयं सप्त अपि राजानः सम्भूय आगताः स्मः। भवतः राज्यस्य सीमायां भवतः उत्तरं प्रतीक्षमाणाः तिष्ठामः" इति।

एतां वार्त्तां प्राप्तवान् काशीराजः अनुक्षणम् एव मन्त्रिणः आहूय सामन्तराजानां सन्देशं श्रावितवान्।

मन्त्रिणः क्षणकालं विचिन्त्य अवदन्– "महाराज ! एतदर्थं भवता स्वयं युद्धक्षेत्रं प्रति गन्तव्यं नास्ति। अस्माकं सेनापतिः वीरवर्मा एतदर्थं नियोजनीयः। सः शत्रून् पराजित्य आगमिष्यति। यदि तेन एतत् साधयितुं न शक्येत तर्हि अग्रे किं करणीयम् इति चिन्तयाम" इति।

एतदनन्तरं राजा सेनापतिं वीरवर्माणम् आहूय अपृच्छत्– "वीरवर्मन्! सप्त सामन्तराजाः अपि सम्भूय आगत्य हठात् आक्रमणं घोषितवन्तः सन्ति। किम् एतां महतीं विपत्तिं सम्मुखीकर्तुं शक्नुयात् भवान् ? किं ते भवता पराजेतुं शक्यरेन् ?" इति।

तदा वीरवर्मा अवदत् – "महाराज ! यदि भवान् पञ्चकल्याणिनम् अश्वं मह्यं दद्यात् तर्हि अहं शत्रून् लीलया जयेयम्। यदि सः अश्वः मया सह स्यात् तर्हि सप्त सामन्तान् किं, समग्रं जगत् एव जयेयम्" इति।

एतस्य उत्तरस्य श्रवणात् नितरां सन्तुष्टः राजा सेनापतये वीरवर्मणे पञ्चकल्याणिनम् अश्वं दत्तवान्।

राज्ञः अनुज्ञां प्राप्य पञ्चकल्याणिनम् अश्वम् आरुह्य महता उत्साहेन एव रणरङ्गं गतवान् वीरवर्मा।

महता धैर्येण उत्साहेन च रणरङ्गं गतः सः अचिरात् एव प्रथमं सामन्तं पराजित्य बन्दीनं कृतवान्। अनन्तरं तेन द्वितीयः सामन्तः अपि बन्दीकृतः। एवं तेन पञ्च अपि सामन्ताः बन्दीकृताः।

षष्ठस्य सामन्तस्य सम्मुखीकरणसमये तदीयः अश्वः नितरां व्रणितः। तथापि सः सामन्तः तु पराजितः जातः। व्रणितस्य अश्वस्य शरीरात् रक्तधारा निर्गच्छति स्म।

'एतं कुत्रचित् परित्यज्य अपरं कञ्चित् अश्वम् आरुह्य मया रणरङ्गं प्रवेष्टव्यम् इतः परम्' इति चिन्तयन् वीरवर्मा पञ्चकल्याणिनः अश्वस्य खलीनादिकम् अपनेतुम् उद्युक्तः जातः।

तदवसरे पञ्चकल्याणित्वेन स्थितः बोधिसत्त्वः नेत्रे उन्मील्य अपश्यत्। ततः सः अचिन्तयत् – 'अहो, अविवेकिता एतस्य ! अन्यम् अश्वम् आरुह्य रणरङ्गं गन्तुम् उद्युक्तः अस्ति अयम्। सप्तमस्य सामन्तस्य व्यूहं भेत्तुम् अन्यः कोऽपि अश्वः न समर्थः। यदि एषः अपरस्मिन् अश्वे विश्वासं कृत्वा रणरङ्गं गच्छेत् तर्हि एतावत्पर्यन्तं मया साधितः विजयः व्यर्थः भवेत्। एषः च शत्रुराजस्य बन्दी सन् मरणं प्राप्नुयात्। काशीराजश्च शत्रूणाम् अधीनः भवेत्, महत् अपमाननं प्राप्नुयात् च। एतत्सर्वम् अजानन् एषः अन्यस्य अश्वस्य स्वीकारं चिन्तयति' इति।

अतः सः वीरवर्माणं स्वसमीपम् आहूय अवदत्– ''अये वीरवर, वीरवर्मन् ! सप्तमस्य राज्ञः व्यूहं भेत्तुं, तं पराजेतुं च समर्थः मत्तः अन्यः नास्ति इति अवश्यं जानातु भवान्। एतावत्पर्यन्तं मया यः श्रमः कृतः तस्य निष्फलता न करणीया भवता। एतादृशे अवसरे भवता धैर्यच्युतिः न प्राप्तव्या। आत्मविश्वासः सहनशीलता च एतदवसरे अवश्यम् अवलम्बनीयः। भवान् मयि पूर्णं विश्वासं करोतु। व्रणप्राप्तिमात्रेण मम सामर्थ्यं न विलुप्तम्। अचिरात् एव मम व्रणानां चिकित्सां कारयतु। ततः मां रणाङ्गणं प्रति नयतु। तेन भवतः जयः निश्चयेनैव भविष्यति'' इति।

एतत् अङ्गीकुर्वन् वीरवर्मा अविलम्बेन एव पञ्चकल्याणिनः व्रणानां चिकित्सां कारितवान्। अल्पे एव काले सः अश्वः चैतन्यं प्राप्य उत्थितः। यदा सः अश्वः उत्थितवान् तदा वीरवर्मा तम् आरुह्य सप्तमस्य राज्ञः व्यूहस्य विद्युद्वेगेन प्रविश्य भेदनं कृतवान्। एतस्मात् सः सप्तमम् अपि सामन्तं बन्धुं शक्तवान्।

एवम् एतस्मिन् युद्धे वीरवर्मणा पूर्णः विजयः सम्पादितः। सः बन्दिनः सप्त अपि सामन्तान् काशीराजस्य पुरतः उपस्थापितवान्। पञ्चकल्याण्यश्वरूपेण स्थितः बोधिसत्त्वः अपि तत्र उपस्थितः।

सः राजानम् अवदत् – ''अये राजन् ! एते सप्त अपि सामन्ताः भवान् इव राजानः एव। एतेषां पीडनं शोभावहं न। एतेषाम् अपमानम् अपि उचितं न। अतः मनसि आगतं कमपि नियमं विधाय तस्य पूर्तेः अनन्तरम् एतान् बन्धविमुक्तान् करोतु कृपया। शत्रूणां विषये अपि यः औदार्यं प्रदर्शयति सः एव श्रेष्ठः राजा इति परिगण्यते लोके। एतस्य काशीराज्यस्य उदारा परम्परा कदाचित् अपि न परित्यक्तव्या भवता। धर्ममार्गम् अवलम्बमानेन भवता न्यायपूर्वकं राज्यशासनं करणीयम्'' इति।

राजानम् एवम् उपदिशन् पञ्चकल्याणिरूपः बोधिसत्त्वः श्रान्तः जातः। अतः भटाः आगत्य तस्य अलङ्कारादिकम् अपनीतवन्तः। ततः अल्पे एव काले सः पञ्चकल्याणिरूपः बोधिसत्त्वः पञ्चत्वं प्राप्तवान्।

ततः राज्ञः सूचनायाः अनुगुणं राजसम्मानानुगुणम् अश्वस्य अन्त्येष्टिः सम्पन्ना। राजा सेनापतेः वीरवर्मणः सम्माननं कृतवान्। सर्वे सामन्तराजाः ससम्मानं तेन प्रतिप्रेषिताः। ते अपि स्वस्य व्यवहारस्य विषये लज्जाम् अनुभूतवन्तः। ते ब्रह्मदत्तं क्षमां याचितवन्तः। ते काशीराज्यस्य मित्रराजाः जाताः।

बोधिसत्त्वस्य उपदेशस्य अनुगुणं राजा न्यायपूर्वकं स्वीयं राज्यं पालयन् उत्तमां कीर्तिं सम्पादितवान्।

## अभिषेकनाटकम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

यस्मिन् कृतिमयूखैः जगत् प्रकाशिते कृतिकारतपने तपति च सर्वाः अपि अन्यकवीनां कृतयः ग्रहाः इव अभवन्, तस्य महाकविभासस्य नाटकचक्राद् अभिषेकनाटकस्य रसास्वादं करिष्यामहे।

**कृतिप्रकारः** – प्रतिमावत् इदमपि रूपकं साहित्यदर्पणोक्तलक्षणानुगुणं नाटकमिति प्रकारेऽन्तर्भवति। अत्र नायकः धीरोदात्तः वीरः च मुख्यः रसः।

**कृतेः आधारसामग्री**– इयं कृतिः प्रमुखतया वाल्मीकि–रामायणमेव अनुसरति। मुख्यं कथावस्तु ततः एव स्वीकृतम्।

**कृतेः नामकरणम्** – अस्य नामकरणं तु नाटकस्य मुख्यं वृत्तान्तम् अधिकृत्य एव कृतम्। वालि–विभीषणादीनाम् इह अभिषेकः वर्णितः।

**नाटके पात्राणि** – रामः, लक्ष्मणः, सुग्रीवः, नीलः, विभीषणः, वाली, अङ्गदः, रावणः, हनुमान् इति पुरुषेषु प्रमुखाः सीता तारा इति स्त्रीषु प्रमुखे।

**नाटकसारः** – सूत्रधारः पारिपार्श्विकः च नाटकस्य प्रारम्भे पूर्वपीठिकाम् अनुबध्नन्तौ विज्ञापयतः यत् रामलक्ष्मणौ हरिहरौ इव सुग्रीवं पुनः राज्ये स्थापयितुम् उद्यतौ। अयं विषयः स्थापनायां वर्णितः।

प्रथमाङ्कस्य प्रारम्भे मञ्चे रामः, लक्ष्मणः, सुग्रीवः, हनूमान् च सन्ति।

रामः राज्यभ्रष्टं सुग्रीवम् आश्वासयति यत् सः स्वीयेन बाणेन युद्धे वालिनं पातयिष्यति। सुग्रीवस्य तु अस्मिन् विषये न मनागपि संशयः। सर्वेऽपि किष्किन्धां प्रति प्रयाणं कुर्वन्ति। रामस्य अनुज्ञापूर्वकं सुग्रीवः वालिनं समराय आह्वातुं गच्छति। तत्र कथयति – **अपराधमनुद्दिश्य परित्यक्तस्त्वया विभो !।**

**युद्धे त्वत्पादशुश्रूषां सुग्रीवः कर्तुमिच्छति ॥**

तारया सह क्रोधम् आविष्टः वाली प्रविशति। सः सुग्रीवं हन्तुं स्वीयं सङ्कल्पम् इत्थं प्रकटयति – "शक्रो वा भवतु गतिः शशाङ्कवक्त्रे। शत्रोर्मे निशितपरश्वधः शिवो वा। नालं यमामभिमुखमेत्य सम्प्रहर्तुं विष्णुर्वा विकसितपुण्डरीकनेत्रः।" तारा मन्त्रिभिः सह मन्त्रणया विना गमनाद् वारयति किन्तु दर्पाभिभूतः वाली ताम् अन्तः गन्तुम् आदिशति। वाली सुग्रीवं हन्तुम् उद्यतः तम् उपगच्छति। उभयोः तुमुलं युद्धं भवति। उभयोरपि अद्भुतं पराक्रमं दृष्ट्वा रामलक्ष्मणौ विस्मितौ। वालिप्रहारेण ताडितः सुग्रीवः पतति। हनूमान् रामम् उपगम्य किञ्चित् कर्तुं निवेदयति –

**"बलवान् वानरेन्द्रस्तु दुर्बलश्च पतिर्मम।**

**अवस्था शपथश्चैव सर्वमार्येण चिन्त्यताम् ॥"**

ततः श्रीरामः धनुषा शरं मुक्त्वा वालिनं प्रति प्रहारं करोति। वाली पतति। मोहम् उपगतः वाली किञ्चित् कालानन्तरम् उत्थाय शरे नामाक्षराणि पठित्वा रामम् उद्दिश्य कथयति –

**युक्तं भो नरपतिधर्मम् आस्थितेन युद्धे मां छलयितुम् अक्रमेण राम।**

**वीरेण व्यपगतधर्मसंशयेन लोकानां छलम् अपनेतुम् उद्यतेन ॥**

वाली रामस्य तादृशं कृत्यम् आक्षिपति गर्हते च।

(क्रमशः... )

## मासवार्त्ताः

### आरब्धः "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः ।







बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थानेन "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ९ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः, व्यक्तिविकासश्च वर्धिष्यन्ते । अत्र उल्लेखनीयं यत् बालैः सह तेषाम् पोषकाणां कृते अपि संस्कृताध्यापनस्य व्यवस्था संस्थानेन कल्पितास्ति।

श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुल व्यासः, श्रीरागिणी गोवाडिया, श्रीऋषिकेशः उपाध्यायः च छात्रान् पाठयिष्यन्ति। अभ्यासक्रमोऽयं मार्चमासपर्यन्तं प्रवर्तिष्यते।

### आयोजिता 'बालाः संस्कृतं च' इति विषये कार्यशाला ।

जूनमासस्य ९ दिनाङ्के एकलव्य-संस्कृत-एकेडेमीसंस्थानेन बालैः किमर्थं संस्कृतं पठनीयम् ? संस्कृतपठनेन के लाभाः इति विषयम् अधिकृत्य कार्यशाला आयोजिता आसीत्। कार्यशालायाः शीर्षकम् आसीत् 'बालाः संस्कृतं च' डॉ. मिहिरः उपाध्यायः डॉ. अमी जोशी च अस्यां कार्यशालायाम् पोषकेभ्यः मार्गदर्शनं प्रायच्छताम्। कार्यक्रमेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थानं बालसंस्कृतवर्गान् कथं सञ्चालयति ? इत्यस्मिन् विषयेऽपि विस्तृता चर्चा अभवत्।

### आयोजितं व्याख्यानम्

जूनमासस्य ८ दिनाङ्के एकलव्य-संस्कृत-एकेडेमीसंस्थाने 'विदेशे संस्कृतम्' इति विषये व्याख्यानस्य आयोजनम् अभवत्। श्रीहर्षः ठक्करः (प्राध्यापकः, शेरिडनमहाविद्यालयः, केनेडा, संयोजकः, संस्कृतभारती, केनेडा च) विदेशे संस्कृतस्य का स्थितिः ? संस्कृतस्य प्रचारः कथं जायमानः वर्तते ? जनाः कथं संस्कृताध्ययनं कुर्वन्ति ? इत्येतेषु विषयेषु संस्कृतरसिकानां मार्गदर्शनम् अकरोत्।

## कृपया हसन्तु

**ह्य: रात्रौ कश्चित् कालं यावत् विद्युत् गता आसीत्; मया सिक्थवर्तिका प्रज्वालिता । यदा विद्युत् आगता तदा सिक्थवर्तिकां निर्वापयितुम् अहं बहु फुत्कारम् अकरवम्, किन्तु अहं सिक्थवर्तिकां निर्वापयितुं न शक्तवान् । 'मम प्राणवायुस्तर: न्यून: जात:' इति मत्वा अहं भयभीत: अभवम् । भयेन मम सम्पूर्णं शरीरं प्रस्वेदेन आर्द्रं जातम् । तदैव मम पत्नी समीपम् आगत्य मम कर्णे उक्तवती - "भो: ! मुखात् मुखावरणं तु अपसारयतु !!"**

★ ★ ★ ★ ★

**शिक्षक: - (पोषकं प्रति) भवत: पुत्रं यदा १ त: १०० सङ्ख्यां वक्तुं वदामि तदा ४५ अनन्तरं ६६ वदति ।**

**पोषक: - मयाऽपि एष: मूर्ख: बहुवारं पाठित: यत् ४५ अनन्तरं ४६ एव आगच्छति... किन्तु यदा भवान् 'Online' पाठयन् आसीत् तदा ४५ अनन्तरं नेटवर्कसमस्या जाता आसीत् । यदा नेटवर्क पुन: प्रस्थापितं तदा भवान् ६६ पाठयन् आसीत् । अत: मम कथनम् अनङ्गीकुर्वन् एष: वदति यत् - "मम शिक्षकेण ४५ अनन्तरं ६६ इत्येव पाठितम्" इति ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**मित्रस्वजनबन्धूनां बुद्धेर्धैर्यस्य चात्मनः ।**
**आपन्निकषपाषाणे नरो जानाति सारताम् ॥**

**तात्पर्यम्** – मित्राणां बन्धूनां च वास्तवस्वभावम्, आत्मनः धैर्यं च मनुष्यः विपदाम् उपस्थितौ एव अवगच्छति।

**मौनी पादप्रहारेऽपि न क्षमी नीच एव सः ।**
**आकृष्टशस्त्रो मित्रोऽपि न तेजस्वी खलो हि सः ॥**

**तात्पर्यम्** – पादप्रहारेण पीडितोऽपि यदि मौनी तिष्ठति, तर्हि सः न क्षमी, सः नीचः एव। शस्त्रेण आकृष्टः तेजस्वी, सः न तेजस्वी, खल एव।

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।**
**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥**

**तात्पर्यम्** – येन इदं जगत् निर्मितं, यः इदं जगत् आवृत्य स्थितवान् तस्मै भगवते आत्मना क्रियमाणानि सर्वाणि कर्तव्यानि पूजा इति भावेन समर्पणेन मानवः सिद्धिं प्राप्नोति।

**यतो यतो हि सङ्घस्य ग्लानिर्लोकेषु जायते ।**
**ततस्ततः समाजस्य सामर्थ्यं परिहीयते ॥**

**तात्पर्यम्** – येषु सन्दर्भेषु देशे सामाजिकसङ्घटनस्य अधोगतिः भवेत् तेषु सन्दर्भेषु समाजस्य सामर्थ्यमपि क्षीणं भवति।

# ज्ञानसरित्

**श्यामः पटेलः**

**''ग्रीन-हाउस-इफेक्ट'' अर्थात् किम् ?**

'ग्रीन-हाउस' इत्युक्ते काचनिर्मितं गृहम् । यथा काचस्य अवरोधत्वात् अपि सूर्यस्य प्रकाशमाना: किरणाः काचस्य पारं गत्वा गृहं प्रविशन्ति तथा सूर्यस्य उष्णतायुक्ताः 'इन्फ्रारेड' नामाख्याः किरणाः अपि काचस्य पारं गच्छन्ति । एते प्रकाशमानाः किरणाः तु परावर्तिताः भूत्वा बहिः क्षिप्ताः भवन्ति । किन्तु ये उष्णतायुक्ताः किरणाः सन्ति ते 'इन्फ्रारेड' किरणाः परावर्ताः भूत्वा प्रकीर्णाः भवन्ति । अतः वातायनस्य काचतः गृहं प्रविष्टाः 'इन्फ्रारेड' किरणाः गृहस्य अन्तः एव तिष्ठन्ति । बहिः न गच्छन्ति । यतः गृहस्य तापमानं वर्धते । एतादृशी एव व्यवस्था 'सोलर-कूकर' मध्येऽपि दृश्यते । तत्रापि काचस्य पेटिकायां 'इन्फ्रारेड' किरणैः तापमानं वर्धते । येन पाकः पच्यते ।

यथा प्रभावः काचस्य गृहे भवति तथा प्रभावः पृथिव्यां 'कार्बन-डायोक्साइड' प्रभृतिभिः वायुभिः सम्भवति । एते वायवः पृथिव्याः वातावरणतः 'इन्फ्रारेड' किरणान् न बहिः गमयन्ति । तेन एव पृथिव्याः तापमानं वर्धते । यद्यपि एते वायूनां तावती मात्रा एव भवति यावत् तापमानं पृथिव्याः कृते अपेक्षितं भवति । एषः क्रमः सर्वथा प्राकृतिकः । किन्तु अस्माकं वाहनेभ्यः, यन्त्रागारेभ्यः ये विषाक्ताः वायवः उद्भवन्ति तैः वायुमण्डले आवश्यकमात्रायाः अपेक्षया 'कार्बन-डायोक्साइड' इत्यादीनां मात्रा वर्धते । यतः पृथिव्याः उपरि आवश्यकतातः अधिकम् औष्ण्यं सङ्गृहीतं भवति । एतदेव 'ग्रीन-हाउस-इफेक्ट' इति कथ्यते । येन पृथिव्याः तापमाने वृद्धिः भवति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **वारिवाहः** | बादल | cloud |
| **अनभ्रः** | बिना बादल का | cloudless |
| **शिखावलः** | मयूर | peacock |
| **भेकः** | मेंढक | frog |
| **जम्बालः** | कीचड़ | mud |
| **कमठः** | कच्छप | tortoise |
| **क्लिन्नम्** | गीला | wet |
| **प्रस्वेदः** | बहुत अधिक पसीना | excessive perspiration |
| **कूलंकषा** | नदी | river |
| **कूपकारः** | कूवाँ बनानेवाला | well-digger |
| **पङ्कम्** | कीचड़ | mud |
| **शालूरः** | मेंढक | frog |
| **महीध्रः** | पहाड़ | mountain |
| **उदधिः** | समुद्र | ocean |
| **वारणः** | हाथी | elephant |

## किं भवन्तः जानन्ति ?

**१ ) गायत्रीमन्त्रस्य द्रष्टा कः आसीत् ?**

(क) विश्वामित्रः (ख) वसिष्ठः (ग) अत्रिः (घ) व्यासः

**२ ) आरुणिः उपमन्युः वेदः च कस्य शिष्याः आसन् ?**

(क) विश्वामित्रस्य (ख) धौम्यस्य (ग) अगस्त्यस्य (घ) भरद्वाजस्य

**३ ) कृष्णस्य गुरुः कः आसीत् ?**

(क) वैशंपायनः (ख) सान्दीपनिः (ग) द्रोणाचार्यः (घ) परशुरामः

**४ ) अश्विनीकुमारयोः कृपया एतेषु कः सुन्दरं रूपं यौवनं च प्राप्तवान् आसीत् ?**

(क) च्यवनः (ख) याज्ञवल्क्यः (ग) वाल्मीकिः (घ) वसिष्ठः

**५ ) एतेषु कः तानसेनस्य गुरुः आसीत् ?**

(क) तुलसीदासः (ख) स्वामिहरिदासः (ग) कुभनदासः (घ) ईसरदासः

**६ ) एतेषु कस्य सम्बन्धः अष्टाङ्गयोगशास्त्रेण सह वर्तते ?**

(क) याज्ञवल्क्यस्य (ख) पाणिनेः (ग) विश्वामित्रस्य (घ) पतञ्जलेः

**७ ) कबीरदासस्य गुरुः कः आसीत् ?**

(क) रामानन्दः (ख) श्रद्धानन्दः (ग) परमानन्दः (घ) विवेकानन्दः

उत्तराणि – (१) क (२) ख (३) ख (४) क (५) ख (६) घ (७) क

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Online / Offline**

**Admission Open**

# संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 23/08/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Third Level

**Date :** 23/08/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતા:**

→ તાલીમ માટેનું ગુણવત્તાયુક્ત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરો: ડો. મિહિર ઉપાધ્યાય **9824616237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006